
# अष्टमः पाठः नदीसूक्तम् । (सरलार्थलेखनार्थम्)

विश्वे विद्यमानं प्राचीनतमं साहित्यं नाम वेदवाङ्मयम् इति बुधाः मन्यन्ते। ऋग्वेदस्य तृतीयमण्डले 'विश्वामित्र-नदी' संवादः वर्तते। विश्वामित्रः नदीं मातरम् इव पूजयति । मानवीया संस्कृतिः नदीतीरे एव विकसिता । अतः अस्माभिः नदी सर्वथा रक्षणीया । **डॉ. मञ्जूषा गोखले** महाभागया नदीसूक्तम् अनुसृत्य रचितात् नाट्यात् संवादोऽयं स्वीकृतः ।



(रङ्गमञ्चे - कीर्तनकारः कीर्तनं करोति, श्रोतृवृन्दः श्रवणे मग्नः ।)

कीर्तनकारः - गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि पृथिव्यां सन्निधिं कुरु ।।
ज्येष्ठमासे शुक्लपक्षे प्रतिपदायां तिथौ गङ्गादशहरापर्व समायोज्यते । पर्वण्यस्मिन् नदीपूजनं कर्तव्यम्।

श्रोतृवृन्दः - नदीपूजनम् ? किमर्थं नदीपूजनम् ?

कीर्तनकारः - नदी खलु जीवनदायिनी । अतः अस्मिन्नवसरे कृतज्ञतां प्रदर्शयितुं जनाः जले दीपदानं कुर्वन्ति। द्रोणे दीपं प्रज्वाल्य नदीजले समर्पयन्ति ।

जलं प्राशनार्थम् । कृषिवर्धनार्थम् ।
विद्युन्निर्माणार्थम् । जलं जीवनार्थम् ।।

सजीवानां कृते नदी देवितमा । नदी मातृतमा । अतः अद्य नदीसूक्तं सर्वथा श्रवणीयं स्मरणीयं च।

श्रोतृवृन्दः - भोः पुराणिकवर्य, कथं नदी अस्माकं माता ? कीदृशाः नदीनाम् उपकाराः ?

कीर्तनकारः - शृणुत आर्याः शृणुत । अतिप्राचीना खलु एषा कथा । अस्ति विश्वामित्रः नाम कुशिकपुत्रः मुनिवरः। सपरिवारं, सगोधनं सः दूरतः आगतः । मार्गम् आक्रामन् सः विपाट् तथा शुतुद्री एतयोः नद्योः सङ्गमं प्राप्तः ।

(ततः प्रविशति विश्वामित्रः । नदीं प्रणम्य... )

विश्वामित्रः – कथं लङ्घनीयः प्रवाहो नदीनाम्, कथं रक्षितव्यं मया गोधनं च ।
कथं याचितव्यस्तरणाय मार्गः, कथं प्रार्थनीया शुभेच्छा नदीनाम् ।।

नदी(विपाट्)– कः खलु एषः मानवः ? अस्मान् किमर्थं वन्दते स्तौति च ? आर्य, किन्नामा भवान् ? कस्माद् अस्मान् आह्वयति ?

विश्वामित्रः – अयि मातः, विश्वामित्रोऽहम् । दूरतः आयातः रथैः शकटैः च । वयं सर्वे परतीरं गन्तुं समुत्सुकाः ।

नदी(शुतुद्री) – विप्रवर, मधुरा खलु ते वाणी । रञ्जयति अस्मान् । वद, कथं तव साहाय्यं कर्तव्यम् ?

विश्वामित्रः – अम्ब, शृणु मे अभ्यर्थनाम् । गाधा मे भविष्यसि ? स्वल्पीभवतु जलौघः । येन वयं सुखेनैव परतीरं प्राप्तुं शक्नुमः ।

नदी(विपाट्)– देवेन्द्रः खलु परमेश्वरः मार्गं मह्यं प्रदत्तवान् ।
हत्वा वृत्रं वज्रहस्तः नदीप्रवाहं विमुक्तवान् ।।
मया न कार्या तस्य अवज्ञा क्रुद्धो देवो भविष्यति ।
क्षमस्व विश्वामित्र कदापि नैव विरामः सम्भवति ।।

नद्यौ – रे विश्वामित्र, नैव विरमावः त्वत्कृते । नैव कुर्वः देवेन्द्रस्य कार्ये अधिक्षेपम् ।

विश्वामित्रः – नैव मातः, मास्तु देवेन्द्रस्य अवज्ञा । केवलम् इच्छामः परतीरं गन्तुम् । हे मातः, प्रसीद । वयं सर्वे तव पुत्राः एव । न वयं कदापि तव उपकारान् विस्मरामः । न किञ्चिदपि अस्माभिः कर्तव्यं येन तव अधिक्षेपः भवेत् । एषा मे प्रतिज्ञा ।

नदी(विपाट्)– किम् ? एषः मर्त्यः मां माता इति सम्बोधयति ?

नदी(शुतुद्री) – कथं माता न करोति साहाय्यं स्वपुत्रस्य ? साधु मानवश्रेष्ठ साधु ! किन्तु, कच्चित् तव वंशजाः मनुजाः तवेदं वचनं विस्मरिष्यन्ति ?


विश्वामित्रः – न हि मातः, नैतत् शक्यम् । सर्वाः सरितः सुखं वहन्तु ।
सर्वे जनाः सुखिनः सन्तु ।। (विश्वामित्रः निर्गच्छति )

कीर्तनकारः – एवं विश्वामित्रः नद्यौ प्रीणयित्वा परतीरं गतवान् । अयि श्रोतारः, इत्थं नद्यः मानवाः च परस्परं प्रीणयन्तः संस्कृतिं संवर्धितवन्तः ।

प्रवाहिता तरङ्गिणी संस्कृतिर्विकासिता ।
प्रमुदिताश्च मानवाः सरित्कृपासमुन्नताः ।।
नन्दिताः कृषीवलाः प्रफुल्लिता वसुन्धरा ।
अन्नदाननिर्भरा सस्यश्यामला धरा ।।
सेतुबन्धरोधितं नियन्त्रितं नदीजलम् ।
जनित्रमत्र चालितं जीवनं प्रकाशितम् ।।

अयि श्रोतृवराः, इत्थं मानवीयं जीवनं नदीतीरे, नदीनामेव साहाय्येन समृद्धम् ।
**अधुना कथयत, अपि विश्वामित्रस्य वचनं तस्य वंशजाः नाम वयं सर्वे मनुजाः अधुनाऽपि अनुसरामः ?**

## भाषाभ्यासः



7MBLM6

**१. माध्यमभाषया उत्तरत ।**

अ) विश्वामित्रः नद्यौ किं प्रार्थयते ?
आ) मानवानां जीवनं नदीनां साहाय्येन कथं समृद्धं जातम् ?